# संस्कृत भाषा परिचयः

# An Introduction to Sanskrit : Unit – XI

M. R. DWARAKANATH

॥ श्री भगवद्गीता – सांख्ययोगो नाम द्वितीयोऽध्यायः ॥

सञ्जय उवाच । सञ्जयः उवाच ।

Sanjaya [m,N,s] (सञ्जयः) spoke [pt]: (उवाच √वच् – द्वित्वा लिट्)

एवं उक्त्वा हृषीकेशं गुडाकेशः परन्तप ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥८॥

हे परन्तप । गुडाकेशः हृषीकेशं एवं उक्त्वा ह गोविन्दं न योत्स्ये इति उक्त्वा तूष्णीं बभुव ॥

Oh scorcher of enemies[m,V,s] (परन्तप) - the thick haired one[m,N,s] (गुडाकेशः) having spoken [ger.] (उक्त्वा √वच्) thus [I] (एवं) to the horripilating one [m,A,s] (हृषीकेशं) and indeed [I] (ह) having said [ger.] (उक्त्वा) I will not [I] fight [ft,1p,s] (न योत्से) to Govinda [m,A,s] (गोविन्दं) he became [pt,3p,s] (बभूव √भू लिट्) silent [I] (तूष्णीं)। Here परन्तप refers to धृतराष्ट्र । गुडाकेशः is अर्जुनः ।

Here is a new सन्धि rule: (सूत्र – लोपः शाकल्यस्य)

The normal rule is when ए, ऐ, ओ वा औ is followed by a vowel, the former is replaced by अय्, आय्, अव्, वा आव् । However, when the former element is the result of a grammatical form (प्रत्यय) the य् वा व् is dropped optionally. Examples:

हरे एहि – हर एहि । योत्स्ये इति – योत्स्य इति । तस्मै इदम् – तस्मा इदम् । No further सन्धि is allowed!

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

हे भारत । हृषीकेशः प्रहसन् इव सेनयोः उभयोः मध्ये विषीदन्तं तं इदं वचः उवाच ॥

Oh Bharata [m,V,s] (भारत – धृतराष्ट्र) Hrsikesa [m,N,s] (हृषीकेशः) as if [I] (इव) smiling [prp,m,N,s] (प्रहसन् √हस्) spoke [pt,3p,s] (उवाच) this [n,A,s] (इदं) speech [n,A,s] (वचः) to him [m,A,s] (तं) who was moping [m,A,s] (विषीदन्तं) in the middle [m,L,s] (मध्ये) of the two [f,G,d] (उभयोः) armies [f,G,d] (सेनयोः) ।

श्री भगवान् उवाच ।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥११॥

त्वं अशोच्यान् अन्वशोचः च प्रज्ञा वादान् भाषसे । पण्डिताः गत–असून् च अगत–असून् न अनुशोचन्ति ॥

You [N,s] (त्वं) have grieved [pt,2p,s] (अन्वशोचः √शुच्) for those are not to be grieved [pot.p,m,A,p] (अशोच्यान् √शुच्) and (yet) [I] (च) you speak [prt,2p,s] (भाषसे) words of wisdom [m,A,p] (प्रज्ञावादान्)। The learned [m,N,p] (पण्डिताः) do not [I] (न) grieve after [prt,3p,p] (अनुशोचन्ति √अनु–शुच्) those whose life breath is gone (dead) [m,A,p] (गतासून्) and [I] (च) and whose life breath is not gone (living) [m,A,p] (अगतासून्) ।

न त्वेवाहं जातुनासं न त्वन्नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतःपरम् ॥१२॥

न तु अहं जातु न आसं एव न त्वं न इमे जनाधिपाः । न च एव वयं सर्वे अतः परं न भविष्यामः ॥

Not [I] (न) indeed [I] (तु) I [N,s] (अहं) ever [I] (जातु) not [I] (न) was (existed) [pt,1p,s] (आसं √अस्) likewise [I] (एव) not [I] (न) you [N,s] (त्वं) not [I] (न) these [m,N,p] (इमे) Lords over men [m,N,p] (जनाधिपाः) । And [I] (च) likewise [I] (एव) we [N,p] (वयं) all [m,N,p] (सर्वे) from here onwards (अतःपरम्) not [I] (न) become [ft,1p,p] (भविष्यामः) ॥

This verse and a few more do not lend themselves to word by word translation. The student should consult translations and/or commentaries for the gist of these verses.

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ १३॥

यथा देहिनः अस्मिन् देहे कौमारं यौवनं जरा तथा देहान्तर प्राप्तिः । धीरः तत्र न मुह्यति ॥

As [I] (यथा) the jiva's (embodied's) [m,G,s] (देहिनः) in this [m,L,s] (अस्मिन्) body [m,L,s] (देहे) childhood [n,N,s] (कौमारं) youth [m,N,s] (यौवनं) old age [f,N,s] (जरा) likewise [I] (तथा) another body [n,A,s] (देहान्तर) attains [f,N,s] (प्राप्तिः) । There (therefore) [I] (तत्र) the wise person [m,N,s](धीरः) is not [I] (न) confused [prt,3p,s] (मुह्यति √मुह्) ।

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्याः तांस्तितीक्षस्व भारत ॥१४॥

कौन्तेय मात्रा-स्पर्शाः तु शीत-उष्ण-सुख-दुःख-दाः । आगम-अपायिनः अनित्याः । भारत तान् तितीक्षस्व ॥

Oh, son of Kunti [m,V,s] (कौन्तेय) material contact (influence) [m,N,p] (मात्रा-स्पर्शाः) but [I] (तु) give feelings of cold, heat, happiness and grief [m,N,p] (शीत-उष्ण-सुख-दुःख-दाः) । Their comings and goings [m,N,p] (आगम-अपायिनः) are not permanent [m,N,p] (अनित्याः) । Oh, the scion of Bharata [m,V,s] (भारत) endure [im,2p,s] (तितीक्षस्व √तिज् - तितीक्ष) them [m,A,p] (तान्) ॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

पुरुष-ऋषभ यं पुरुषं एते न व्यथयन्ति हि सम-दुःख-सुखं धीरं सः अमृतत्वाय कल्पते॥

Oh, bull among men [m,V,s] (पुरुष-ऋषभ) the person [m,A,s] (पुरुषं) whom [m,A,s] (यं) these [m,N,p] (एते) do not [I] (न) afflict sorrow [prt,3p,p] (व्यथयन्ति √व्यथ्) the wise [m,A,s] (धीरं) who is eqanimous to pleasure and pain [m,A,s] (सम-दुःख-सुखं) he [m,N,s] (सः) is fit [prt,3p,s] (कल्पते √क्लृप्) for immortality [m,D,s] (अमृतत्वाय) ॥

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

असतः भावः न विद्यते । सतः अभावः न विद्यते । तु अनयोः उभयोः अपि तत्त्व-दर्शिभिः अन्तः दृष्टः ॥

The unreal's [n,G,s] (असतः) becoming [m,N,s] (भावः) (is) not [I] (न) found [prt,3p,s] (विद्यते √विद्) । Reality's [n,G,p] (सतः) unbecoming [m,N,s] (अभावः) (is) not [I] (न) found [prt,3p,s] (विद्यते √विद्) । But [I] (तु) even [I] (अपि) these [m,G.d] (अनयोः) two [m,G,d] (उभयोः) is surely [m,N,s] (अन्तः) seen [ppp,n,N,s] (दृष्टः) by the seers of truth [m,I,p] (तत्त्व-दर्शिभिः) ॥

२ वृत्तयः – **Expositions / Glosses**

२-१ कृद्वृत्ति – **Participles etc.**

२-१-१ भविष्यत् कृदन्तस्य प्रयोगाः

– **Future participle Usage**

रक्षःकायस्य पतिष्यतः कण्ठच्छेदपरंपरा - the row of severed necks of the Rakshasa's body that was about to fall....

यक्ष्माणौ यजमानौ सस्नतुः - the two masters who were about to start the yajna bathed.

Note the agreement of the participle with the noun it modifies. In the 1st example, it is genitive singular while in the 2nd it is nominative dual.

२-१-४ परोक्षभूत कृदन्तस्य प्रयोगाः

- **Past perfect participle usage**

जग्मुषीः राज्ञीः दृष्ट्वा - having seen the departing queens ..

राजद्वारे तस्थिवांसं भरतं जनाः अभिननन्दुः । People greeted that Bharata who had camped at the gates of the kingdom.

Note the agreement of the participle, in gender number and case.

३-२ समासवृत्ति - **Compounds**

समसनं समासः – समास is the compounding of nominals. व्यास (वि – आस) is the dissolution of a compound and the constituents of dissolution is called विग्रह वाक्य । The great sage व्यास is so called because of his work in classifying or arranging the Vedas!

३-२-१ तत्पुरुष समासः

३-२-१-१ व्यधिकरण (विभक्ति)

- **Oblique case compounds**

Unlike the कर्मधारय where the two members of a

compound are in case apposition, two members of विभक्ति तत्पुरुष are in oblique cases. Because the final member is placed in the nominative, there are 6 possible compounds belonging to this (oblique) category. The तृतीया and षष्ठी तत्पुरुष are encountered most frequently.

The English word Bluebird is an example of case apposition and can be viewed as a कर्मधारय समास । However, hand-made (made by hand) can be viewed as तृतीया तत्पुरुष । Williamson (William's son) as a षष्ठी तत्पुरुष । Kiln-dried (dried in a kiln) as a सप्तमी तत्पुरुष ।

द्वितीया तत्पुरुष

कालं अतीत: – कालातीत: । समं आश्रित: – समाश्रित: । ग्रामं गत: – ग्रामगत: ।

तृतीया तत्पुरुष

शरेण हत: – शरहत: । लोभेन मोहित: – लोभमोहित: । दध्ना ओदन: – दध्योदन: । प्रज्ञया वाद – प्रज्ञावाद ।

चतुर्थी तत्पुरुष

गवे हितम् – गोहितम् । पादाभ्यां उदकम् – पादोदकम् ।

पञ्चमी तत्पुरुष

चोरात् भयम् – चोरभयम् । वृक्षात् पतित: – वृक्षपतित: ।

षष्ठी तत्पुरुष

दशरथस्य नन्दन: – दशरथनन्दन: । राज्ञ: पुरुष: – राजपुरुष: । जननां अधिप: – जनाधिप: । तत्त्वस्य दर्शि – तत्त्वदर्शि ।

सप्तमी तत्पुरुष

कूपे मण्डूक: – कूपमण्डूक: । वाचि पटु – वाक्पटु ।

A general property of compounds is the loss of the case inflexion or विभक्ति प्रत्यय । However, there are exceptions where the case termination is retained. Such compounds are called अलुक् समास - or non-loss of case-endings!

अलुक् समास

ओजसा कृतम् – ओजसाकृतम् न ओजस्कृतम् (तृतीया)- Done by strength.

परस्मै पद – परस्मैपद न परपद (चतुर्थी ) - A verb whose fruit of action accrues to another (non-doer)

दूरात् आगत: – दूरादागत: न दूरागत: (पञ्चमी) - Coming from far

वाचो युक्ति: – वाचोयुक्ति: न वाच्युक्ति: (षष्ठी) - Aptness of speech

युधि स्थिर – युधिष्ठिर न युध्स्थिर (सप्तमी) - One who is firm in battle.

In the above examples, the actual case termination was retained. Some pronouns when compounded changes it's case to पञ्चमी विभक्ति ।

मम पुत्र: – मत्पुत्र: न अस्मत्पुत्र: ।

३-२-१-२ नञ् तत्पुरुष Negation

In Sanskrit the particle न is used for negation and the particle is compounded with the nominal. The न is changed अ to before a consonant अन् and before vowel sound. Again, there are situations where the न is unchanged! This compound is not a strict compound in the sense of losing the case inflection, as the particle is an indeclinable.

न विद्या – अविद्या । न सत् – असत् । न अर्थ: – अनर्थ: । न स्त्री वा पुमान् – नपुंसक । न क्षरति इति – नक्षत्रम् ।

३-२-१-३ उपपद तत्पुरुष
**Word prefixed Compound**

In this compound the 2nd word is actually a finite verb! The verb reduces to the root and it is also called a reduced word compound.

सर्वं जानाति इति – सर्वज्ञ: । खं गच्छति इति – खग: । जलं मुञ्चति इति – जलमुच् । पादेन पिबति इति – पादप: । प्रियं वदति इति – प्रियंवद: ।

४ तिङन्तप्रकरणम् – **Verbs / Conjugation**

४-१ सामान्यभविष्यत्काल (लृट्)
– **Ordinary Future tense**

There are two future tenses in Sanskrit and both types belong to आर्धधातुका: । The verbal

terminations are added directly to the root rather than to the stem. However, we recall that इ may be added, optionally added or not added depending on whether the root is सेट्, वेट् वा अनिट् ।

This future tense uses the tense marker स्य and fortunately, the terminations are exactly the same as लट् in परस्मैपद च आत्मनेपद । The algorithm for forming the finite future verb is:

धातु + (इ) + स्य + लट् तिङ् । इ + स्य → ष्य। When स्य is preceded by a consonant, special sandi rules apply! The following are examples of the 3rd person singular ऌट् ।

गम् – गमिष्यति (सेट्) । दा – दास्यति (अनिट्) । शप् – शप्स्यते (अनिट्) । शक् – शक्ष्यति (अनिट्) । भाष् – भाषिष्यते (सेट्) । मृज् – मार्जिष्यति वा मार्क्ष्यति (वेट्) । धू – धविष्यति वा धविष्यते वा धोष्यति वा धोष्यते (वेट् – उभयपद) ।

**सन्धि Rule:**

The कण्ठ्य च तालव्य consonants of the root change to क् । The स्य changes to ष्य । क् + ष्य or क्ष्य । Other consonant sandhi rules and a few other changes (गुण, वृद्धि) also occur as can be seen below:

दृश् – द्रक्ष्यति । अद् –अत्स्यति । मन् – मंस्यते । रुध् – रोत्स्यति । त्यज् – त्यक्ष्यति ।

**Exercises:**

1. Form the समास वा विग्रह । Identify the विभक्ति ।

शोकेन आकुलः । अश्रुपूर्णः । वनवासः । कङ्कणाय मणिः । काशीपथम् । रविवारः । कूपोदकम् । वटस्य पत्रः । चोरभयम् । वृक्षपतितः । विद्याप्रवीणः । आत्मनेपद । कृष्णं आश्रितः ॥ अनादर । न प्रिय । न अपेयम् । अज्ञः ॥ उरगः । कुम्भकारः । पङ्के जायते इति । रथे तिष्ठति इति । विश्वं पालयति इति ॥

2. Change the tense from present to future or vice versa.

सः धनं ददाति । शिशुः क्रीडिष्यति । ब्राह्मणाः यक्ष्यन्ते । त्वं द्रक्ष्यसे । ग्रामे वसामि । सूर्यः तप्स्यति । पुण्यानि लभस्व ।

**Sanskrit Crossword #11**

(One syllable per box)

**Clues Across:**

1 Brahmana, scholar
4 Atom
5 Half year from July to January
6 Astrologer, Arithmetician
8 Path, going
10 With bead (Inst.)
11 Mongoose
12 The sun
13 Father, Rama's father-in-law

**Clues Down:**

2 Circumambulation
3 Salutation
4 Drinkable (double negative!)
6 Elephant faced
7 Brahma- born of lotus
8 Ring (nameless) finger
9 Genitive of City

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | २ | ■ | ३ | ■ | ४ | |
| ■ | ५ | | | | | ■ |
| ■ | | ■ | | ■ | | ■ |
| ६ | | ७ | ■ | ८ | | ९ |
| | ■ | १० | | | ■ | |
| ११ | | | ■ | १२ | | |
| | ■ | १३ | | | ■ | |

**Solutions to Exercises from Unit -10**

1. महाराजा । पुण्योदकम् । चन्द्रवदन । राजर्षि । दशरथमहाराजः । महानदी । पञ्चाङ्गम् । अष्टाध्यायी ॥ महती लक्ष्मी । षडाणां वर्गाणां समाहारः । विद्या धनं इव । नरः सिहः इव । वटः वृक्षः ॥

2. Solution to crossword # 10

१ क्षिप्र । ४ विना । ५ सहस्रनाम । ६ अणक । ८ तस्कर । १० मण्डप । ११ सरल । १२ नीरक । १३ जनाय ॥ २ प्रसवण । ३ प्रस्रव । ४ विमनस्क । ६ अतिसर । ७ कमलज । ८ तपनीय । ९ रत्नाकर ॥